॥ ॥इदं स्पस्तार्थसारपुस्तकं विष्णुखोंडस्य ॥ ॥

श्रीगणेशायनमः ॥ कर्मधेनोद्धृतोपापौघौ कस्य दृष्टान्तादिषु ॥ शंखद्रविडकेदारकोष्ठयघैश्च
भाषितं ॥ मन्वत्रियाज्ञवल्क्याद्यैर्व्याख्यातं प्रतिपादितं । तस्यार्थसारं वक्ष्यामि सुखानुष्ठान
सिद्धये ॥ २ ॥ अथ क्रमपश्चिमानुष्यने ॥ तत्र पापिनामप्रायश्चित्तानां नरकभोगांते ये
कर्मविपाकाः सुखदुःखलक्ष्यंते अज्ञानाद्ब्रह्महा मृगश्वसूकरोष्ट्राणां योनिं याति । सुरापः खर
पुल्कसवेनानां । सुवर्णस्तेयी विड्जातिजन्यक्रिमिकीटपतंगत्वं । गुरुतल्पगः तृणगुल्मलता
वक्रमाधाभि । ज्ञानाद्ब्रह्महा श्वसूकरखरोष्ट्रगोजाविमृगपक्षीचंडालपुल्कसानां योनिं याति
सुरापो विड्क्रिमिकीटपतंगपक्षिहिंस्रसेवानां योनिं याति । सुवर्णस्तेयी [?]णनालकक
भासनिरध्वांवांचुवारिणां च हिंस्राणां पिशाचानां सहस्रशो योनिं याति । गुरुतल्पगस्तृणगु
ल्मलतानां क्रव्यादानां क्रूरकर्मणां च योनिं याति । नरो योगीवतहत्य । ततो मनुष्यजन्मनि
ब्रह्महा क्षयरोगी स्यात् सुरापो निजश्यावदंतः । सुवर्णस्तेयी कुनखी । गुरुतल्पगः कुष्ठी ।
नतां योगीवनइत्य । पतस्य स्त्रियं [?] निर्जले अरण्ये ब्रह्मराक्षसः स्यात् । [?] अनध्या
याध्यायी डः अनियाहसा । अन्ने रत्ने वा हत्वा अजीर्णव्याधिरसंनद्दरिद्रो वा । ह्योनं वदे

वायं पुत्तकं मूकः । पत्रं रक्तं मारः । हेम रत्नानि हेमकारी पक्षी । अस्पृश्यं दरिद्रो वा । न्यासमपहत्य
दरिद्रो वा । ताम्रधातु छुछुंदरी राजमक्षिका । धान्यानि मूषकः । गिलतैलपायी कीटकः । परस्वहर
तोनानोतिर्यक्स्यात् । कुतं हविरमत्रहरन्यादिडुः खीवः । पानं हरनुदुरः । फलं कपिः । अलको
लूकः । पतंगो वा । पक्षी मत्स्यो वा । क्षीरं काकोवत्सो काको वा । गृहोपस्करं गृहहारी कीटः । मधुदंश
कीटो वा । मांसं गृध्रः । गां गोधा सर्पो वा । अग्निं बकः । वस्त्रं कुष्ठी पतंगो वा । रसं श्वा । लवणं चिरी
कीटः । तैजसं मंडली । गोदेवब्राह्मणस्वं पांडुरोगी । न्यासको कैषाः अनपत्यो वा । शय्यां क्षपण
कः । शंखं शुक्तिं हरन् कपाली । दीपं कौशिकः । स्त्रीहत् क्षयी । पत्नीं परप्रेष्यः । पथशहरगिनंनरस्र
कारः श्वा नीजायते । नक्षत्रं ध्वविकलो वा । ब्राह्मणीं गत्वा निवृत्तज्ञी । मातरं स्नुषां वा वा गत्वा षण्ढो
चंडाली पुल्कसी वा अजगरः । प्रव्रजितां महापिशाचः । शूद्री दीर्घकीटः । सवर्णां दरिद्रः । राज
स्त्रियं नपुंसकः । गां गत्वा मंडूकः । धान्यमिश्रकोविरिक्तोगः । पिशुनो दुर्गंधनासिकः । सूच
को दुर्गंधास्यः । देवब्राह्मणकोशकः खल्वतिः । गरदाग्निदो उन्मत्तो । गुरुप्रतिहंता अपस्मारी रो
गी । गोघ्नश्चांधः । धर्मपत्नीमुत्सृज्य अन्यत्रप्रसक्तः । शास्त्र वेधी श्वापी । कुंडाशी नगरतस्करः । स्त्रीपण्य
जीवी षंढः । कोमारदारत्यागी [illegible] दशीवानरोवा नरगुल्मी वा । अस्तशाखकोगंडमा

आत्मजणी सगोत्राशरणागतानां मातुःसखी राजपत्नी स्तनधात्री अनुमातरं मातुः स्वसुः सखी मातुलानी
सखीभगच्छन् गुरुतल्पगवत्सद्यः पतति। तथापितृमातृयोनिसंबंधगास्तेन नास्तिकनिंदितकामी
साम्यनिंदितकर्मस्यागि पतितमाः याग्य पतितत्यागिनः पतितनाः पातकसंयोजकाश्चैत्पंतु पातकि
नः॥ अथोपपातकानि। तत्र योगीश्वरः॥ गोवधो व्रात्यता स्तेयमृणानां चानपाक्रिया। अनाहिताग्नि
ता पण्यविक्रयः परिवेदनं। भृतकाध्ययनादानं भृतकाध्यापनं तथा। पारदार्यं पारिवित्यं वार्धुष्यं ल
वणक्रिया। स्त्री शूद्र विट् क्षत्रवधो निंदितार्थोपजीवनं। नास्तिक्यं व्रतलोपश्च सुतानां चैव विक्रयः।
धान्यरूप्यपशुस्तेयमयाज्यानां च याजनं। पितृमातृसुतत्यागस्तडागारामविक्रयः। कन्यासंदूषणं
चैव परिवेदकयाजकं। कन्याप्रदानं तस्यैव कौटिल्यं व्रतलोपनं। आत्मनोर्थे क्रियारंभो मद्यपस्त्री
निषेवणं। स्वाध्यायाग्निसुतत्यागो बांधवत्याग एव च। इंधनार्थं द्रुमच्छेदः स्त्रीहिंसौषधजीवनं। २
हिंस्रयंत्रविधानं च व्यसनं चात्मविक्रयः। शूद्रप्रेष्यं हीनसख्यं हीनयोनिनिषेवणं। तथैवाना
श्रमेवासः परान्नपरिपुष्टता। असच्छास्त्राधिगमनमाकारेष्वधिकारिता। भार्याया विक्रयश्चैषा
मेकैकमुपपातकं॥ अथ गोवधः। गोपिंडमात्रव्यापादनं। कालेनुपनीतत्वं व्रात्यत्वं आत्मनः स
वर्णतस्मादर्वाक् परस्वहरणं स्तेयं। गृहीतस्य सुवर्णादेरप्रदानं ऋणानपाकरणं। [illegible]

पितृऋणानपाकरणं वा। सत्यधिकारे अनाहिताग्नित्वं। अपण्यस्य लवणादेर्विक्रयः। सोदरे ज्येष्ठेऽव्या
नरिस्थिते कनिष्ठस्य दाराग्निहोत्रग्रहणं परिवेदनं। पणपूर्वाध्यापनं भृतकाध्यापनं। गुरुतल्पत
समव्यतिरिक्त परस्त्रीगमनं पारदार्यं। कनिष्ठेसविवाहे ज्येष्ठस्य विवाहराहित्यं पारिवित्यं। निषि
द्धवृद्ध्युपजीवित्वं वार्धुष्यं। लवणस्योत्पादनं लवणक्रिया। अनात्रेय्या अंगसिण्या अपि स्त्रिया वधः
स्त्रीवधः। शूद्रवधः। अदीक्षित क्षत्रवैश्यवधः। स्त्रीजस्त्राविलादूर्ध्वादर्थोपजीवनं निंदितार्थोपजी
वनं। परलोकाभावबुद्धिर्नास्तिक्यं। अस्त्रवास्त्रिया स्त्रीसंगो व्रतलोपः। देवताराधनार्थं गृहीतव्र
तलोपश्च। अपत्यानां विक्रयो दासीत्वार्थं। आत्मनो भार्यायाश्च तद्वत्। तडाकारामोपवनादेर्वि
क्रयश्च द्रव्यग्रहणेन। व्रीह्यादिधान्यानां स्तेयं। असारद्रव्यसीसकादिकुप्यस्तेयं। गवादेः प
शोश्च। अभिदुष्टशूद्रादीनां याजनं। कर्मदुष्टव्रात्यादीनां च याजनं। भोजनं चोत्तपत्र अपतिता
नां पितृमातृसुतानां गृहीताग्नेरपि त्यागः। अंगुल्यादिना योनिविदारणं कन्यादूषणं। परिवे
दकयाजनं। तस्मै कन्याप्रदानं च। गुरौ कौटिल्यं। आत्मार्थं पाकादिक्रिया। मद्यपायाः स्त्रिया
श्चोपभोगः। कुटुंबार्थं स्वाध्यायत्यागः। सच्छास्त्रार्थविभंगमात्रो यंच स्वाध्यायत्यागः। अंग

स्मार्त्ताग्नीनां च। संस्काराद्यकरणेन शूद्रस्य। शाकौषधीनां च। पाकादिदृष्टकार्यार्थं वा द्रुम
च्छेदः। भार्यापण्यत्वं वेश्यायोऽन्यस्त्रीपुरुषोपजीवनं वा। स्त्रीधनोपजीवनं वा। प्राणिवधेन जीवनं
हिंसाजीवनं। वेरपायोषौषधिजीवनं। जालवह्नित्र्यादिविधानं। तिलेक्ष्वादिपीडनाद्यैर्हिंसा वा
यंत्रप्रवर्त्तनं नूणामृणं यंत्रप्रवर्त्तनं च। व्यसनं मृगयादीन्यष्टादश। शूद्रसेवा शूद्रजे व्यं ही
नेषु मैत्रं हीनसख्यं। अकृतसवर्णाविवाहस्य हीनवर्णाविवाहो हीनयोनिनिषेवणं साधारण
स्त्रीभोगश्च। अग्रहीतस्य मलमनाभिवे। परपाकरतिः परान्नपुष्टत्वं। चार्वाकादिग्रंथाभ्या
सोऽसच्छास्त्राधिगमः। सुवर्णाद्युत्पत्तिस्थानेषु राजाज्ञयाधिकारित्वमाकरेष्वधिकारित्वं। भार्याया
विक्रयः वक्रारान्यआतिचारं। लशुनादेरमत्याभक्षणमित्यादीनि॥ अथ जातिभ्रंशकरसंज्ञानि॥

४

ब्राह्मणस्य रुजः करणं। अघ्रेयमद्यघ्राणं जैह्म्यं पुंसि मैथुनं। अथ संकरीकरणानि॥ खराश्व

४

उष्ट्रमृगहस्त्यजाविमीनाहिमहिषाणामन्येषां ग्राम्यारण्यपानां पशूनां वधः॥ अथापात्रीकर
णानि॥ निंदितेभ्यो धनादानं वाणिज्यं शूद्रसेवनं कुसीदजीवनं। असत्यभाषणं॥ अथ मलिनी
करणानि॥ कृमिकीटजलस्थलजवयोहत्या मद्यानुगतभोजनं। फलैधःपुष्पस्तेयं

च अधैर्यं च॥ अतोन्यानि पापानि प्रकीर्णसंज्ञानि॥ अथ महापातकप्रायश्चित्तानि॥ तत्र ब्रह्मास
णं कृत्वा बालवस्त्रकलवीरादिवासा। जटी वा पिततो वा स्वेन घातितब्राह्मणस्य शिरःकपालं चिन्हार्थं धा
रयंस्तदलाभेन्यस्य नाथ ब्राह्मणस्य वानन्यदेव वा शिरःकपालं ध्वजं दंडे धारयन्नन्यैरक्षाधे रेवं
वारश्च समात्रमिताशी संपतन्स्त्रिकालस्नायी संध्योपासनं च विविधमंत्रं पर्वकं कुर्वन्ति ध्ययनाध्या
पनप्रवचनयजनयाजनप्रतिग्रहादि वर्जयेत्। ब्रह्मचारी व्यामधुमांसगंधमाल्यादि वा निरांजना
भ्यंजनोपानच्छत्रकामक्रोधलोभमोहपहर्षनृत्यगीतपरिवादादि वर्जयेत्। सर्वत्र तरितुः आर्यसंद

५ श्रा

र्शने पथोऽपक्रमेत्। स्थानासनाभ्यां विहरंस्तीर्थान्यनुवसन् वनेषु पुण्यासमेवाकुटीं कृत्वा नि
वसन् ग्रामान्ते गोव्रजे वा ध्व ह्रीं मूले वा द्वादश वर्षमेवं चरित्वा शुद्धः। यदि वन्येन जीवति तदा भिक्षार्थं ग्रामं
प्रविशेत्। तत्र लोहितकेन मृन्मयकुंडशरावेणागृहद्वारे स्थित्वा ब्रह्महास्मीति स्वं पापं प्रख्यापय
न् सप्तागाराणि भिक्षेत। भिक्षाविवेकेन चानुवर्ण्यं त्रैवर्णिका ते [illegible] यथालाभ एककालमेव मिताशी
द्वादशाब्दं गतं चरित्वा शुद्धः। य [illegible] द्वादशाब्दं नियतः प्राजापत्यं कृच्छ्रं निरंतरमावर्ष चरेत् धिक
चिरात् चरित्वा शुद्धः। द्वितीयेऽप्यसवधे द्विगुणं प्रायश्चित्तं। तृतीये त्रिगुणं। चतुर्थे न निष्कृतिः।

मधान्य वर्ष्याहि कृच्छ्र तिपापं गोसहस्रं प्रजेर्धनोन्निश्च वेशमरणांतं वा कुर्यात्॥ षोडशात्वाद्द्वर्षं
अस्य॥ निवर्षास्य यमेवचरेत्सुः गुरुत्राम स्थित्त्वेल घुप्राय श्चित्तस्यांतर्सर्वे प्रसंगादल्पहा
नसिद्धिं सोमयाग स्थश्चास्य णावधो हि गुणं व्रतं॥ तद्दशा कोगवां सहस्रं विधिवत्स्त्वात्रे स्यो
दशात्॥ आचार्यव धे द्वादशो व्दत्रतं गोसहस्रं च उपाध्याय अंगवक्ते वान्ते कृच्छ्र विप्रोन
वेदाद्ध्यात ब्रह्मताह र्त्यं गोसहस्रं पादोनं अर्द्ध पादं च रेदित्साद्य प्यूहं॥ तारतम्येन कल्प्यं तव
स्ति विद्वच॥ गुरुवधे यावज्जीवं व्रतं चरेत्॥ त्रिगुणं चतुर्गुणं वा॥ तद्दशाकोद्वादशाब्दं सो क
गोसहस्रं च कुर्यात्॥ सयद्विद्वादशाब्दं चरन्मध्ये योरव्याघ्राघ्रेर्हन्यमानं एकं व्रासणं गां
वा दत्वा कं वा सानुमंतरे कृत्वा रक्षेद से ह्रस्र द्वादशा ब्दौपितदेवसिध्यति॥ यदितत्र प्रहर्ता
स्तदक्षसेव प्रियेत तथापि तेदेवशुध्यते॥ परा श्वमेधादि महायज्ञावभृथे यजमानसम्मि
धौ स्वपोपमः स्विजां दिरव्याप्यते रन्तुत्तानः स्नातो तदेवशुध्यति॥ यज्ञाजनमध्येकुशानि द्री
घ्नीआत्या॥ घियस्तं व्रासणं गां वोपधैः संरक्षपत्ने देवशुध्येत्॥ यज्ञाजनमध्ये विप्रस्य हस्त

५ ५

हि सर्वस्वं चौरे हृतं सर्वदत्ता शुध्येत्॥ तत्र स्थितस्तेऽहं तोवाच कुक्षतोमृत कल्योजीवन्नधि॥ देव
शुध्येत्॥ ज्ञानाद्रसवधे चतुर्वर्णाभृत्गुपतनमग्निपतनं वा कुर्युः॥ तत्र पत्रैवर्णिका इष्ट प्रथ
मयज्ञास्तेग्नि पतनं वा॥ स्वार्जितं गोसवमतिजिद्भ्यजितो॥ त्रिर्दग्नि कृतेवा क्रमेणानल्पद
क्षिणं कुर्युः क्षत्रियः सार्वतो मस्थे दश्वमेधं कुर्यात्॥ यदज्ञा नात्रि वर्णिकाः साग्निकामहापाप
कुर्युः॥ तदग्निनादोषक्षया शुत्रादयोरक्षे युः॥ ज्ञानोद्येत्गृह्याग्निं दासयेत्॥ वैतानिकान स्मृ
ति पेत्॥ ततोग्निपतनादि प्रायश्चित्त करणे कुर्वतो मरणे चैवं सपरिछदं॥ विद्वाश्चैत्निर्धनो गु
णी हंता हतो निर्गुणारण्ये नियतास्त्रि वारं वेदं जपेत्॥ अर्थात्कृच्छ्रं द्वे दं जपन्यो जनशतं अज
स्त॥ अविद्वानिर्द्धनो गुणी ब्रास प्रस्यवणात् आपश्चिमो दधेः अतिस्त्रो तः सरस्वती हविष्य
मिताशी गच्छेत्॥ निर्गुणोधनी हंता वेद पात्रे गृहत्तेहेमा हि जीवन समर्थ दद्यात्॥ गृहं वा सो
पस्करं जीवन समर्थं अनपत्यस्यैत्सर्वस्वं॥ एतत्र्यये अन्यतमं गृहीत्वा आहिताग्निर्वैश्वान
रेष्टिं अनाहिताग्निर्वैश्वानरं स्थाली पाकं कुर्यात्॥ हंता मृत्ये निर्धनो विप्रमात्रेवधे अधःशप
ये निपर्वणी लिकर्मवेदयन् नैमाशी महानदीसंगमादि पुण्याश्रम गोष्ठपर्वतप्रस्रव

नामपो वन विहारी। स्त्रान विहारासनी वस्त्र रूक्मं वा रिहार त्न हेम गो धान्या तिल दधि सर्पे श्चि
ति श्रे स्पोदधान्या मनसा श्रस्त वधेध्य व मायं कृत्वा स्वयमेवोपरतो द्वादशाब्दं जल्ला याद्वादशा
हं तु पवसे दित्य। द्वि अन्यतमे भुविकल्प्यो विषमेषु व्यवस्था कल्प्यः। तच्चानि द्वादशाब्दादे
नि ब्राह्मणस्यैव। द्विगुणं क्षत्रियस्य त्रिगुणं वैश्यस्य शूद्रा देश्चतुर्गुणं तत्रापि हन्तुहन्यमा
न गुण विशेषेण प्रायश्चित्ते विशेषो ऽह्येयः। एवं क्षत्रवैश्यपादावपि हीनोत्कृष्ट वधे प्रायश्चि
त्त तारतम्यं दंडगौरवात्कल्प्यं। अनुलोमप्रतिलोमजानां तु दंडवत्प्रायश्चित्तं गृहस्थान
द्विगुणं ब्रह्मचारिणां वानप्रस्थस्य त्रिगुणं यतेश्च चतुर्गुणं। ब्रह्मचारिणो द्विगुणं षोडशाब्दाद
र्ध्वमेव सर्वत्र अकामतः प्रायश्चित्तस्य मध्ये मरणे तु देवशुद्धिः। अयाति देशः सीमया गस्य तत्र वै
श्य वधे ब्रह्महत्याव्रतं द्वादशाब्दिकं चरेत्। ज्ञानाद्द्विगुणमेव। न प्राणान्तिकं। तत्र च जातिगुणा ६
द्यपेक्षया व्यवस्था। सर्वत्र स्त्रीपुंनपुंसकत्वेनाविज्ञानगर्भस्य वधे कृतं मृत्यात्रेयी अत्रिगो
त्रा वा आत्रेयी। तस्याश्च यथावर्णपुरुषहत्यावद्व्यवहारे साक्षपुंसत्वोक्तो वर्णो नांब धत्रा ह्मो
सा शिष्टगुरोः क्रोधावेशीय। ब्राह्मण निक्षेप हत्वा आहिताग्नि ब्राह्मणानां यसगुणां सोम

गस्था वधा तको ब्रह्महत्याव्रतं चरेत्। आहितदेशकेषु पादोनं प्रायश्चित्तं। प्रायश्चित्तस्यातिदेशोन परि
स्यथ। ब्राह्मणादि वधार्थं शास्त्रप्रहारके न वि स्मृतिवधे नाशो नम्र नस्त पापि ब्रह्महत्यादिव्रतं पादोनं
चरेदागमने इष्ट पत्नपादः ब्रह्महत्यासमानेऽहं प्रायश्चित्तं। सर्वत्र साक्षात्कर्तुरन्तु ग्राहकस्य पा
दोनं। प्रयोजकस्याहं। अनुमंतुः साई पादं निमित्त कर्तुः पादं ज्ञोत्साहकादीनां च तारतम्यं विधा
न्। सर्वत्र बाल वृद्ध स्त्रियो रोगिणः साक्षात्कर्तुकेऽपि प्रायश्चित्तार्हं महंति। अशीति वर्षा वृद्धः षं
ह्द। षोडशावर्षा स्त्री कुबालः। अनुपनीतानां बालानां कन्यानां च प्रायश्चित्तं पादो नक्षपि तास्या
ता वास्तु ह्व वरेत्। ते नोद्वादशाब्दो तेनेः चरेयुः। ऊर्ध्वं स्वयमेव चरेयुः। सर्वत्र जाति शक्ति गुणा
द्यपेक्षया व्यवस्था॥ इति सर्वसारे ब्रह्महत्यादि प्रायश्चित्तं॥ अथ सुरापान प्रायश्चित्तं॥ तत्र
इव्यासुरा पैष्टी गौडी माध्वी तु मध्यो तत्र सुरां त्रैवर्णिकस्तया शूद्र स्त्री च वाचं वर्ण्य विवाहे
त्सत्य दिन पिबेत्। यदि सुरां ज्ञानात्सकृत्पिबेत्। सुरां गोमूत्र क्षीर घृतानामन्यतमम ग्नि से
ते न कृत्वा आर्द्र वासा लौह न पात्रेण पायसेन ताम्रेण वा पीत्वा मरणाच्छुद्धो। राजा ज्ञानाज्जल बुध्या
सुरापीनेतो मुल मात्र संयोगे जटिवा लस्वी राद्वि वासा ब्रह्महत्याव्रतं नाचि र वर्जं द्वादशाब्दं समरणं कुर्यात्।

नपादोने। सर्वत्र स्त्री बालवृद्धादीनामर्द्धं षडब्दं। अनुपनीतानां कन्यानां च पादं त्र्यब्दमेव विधातव्यं। ज्ञाना
द्विगुणं। यदि पीता छर्द्दितं त्र्यब्दं रात्रौ सकृत्पिण्याकमेवाश्नीयात्। नाश्नीयात्। सुरापाने तु मात्रसं
योगे वर्षं बालवासा जटी नयाकुर्यात्। सुरेकौषधरोगार्थे पाने वज्ञाने कृच्छ्रं त्र्यब्दं पादं वा चान्द्रायणं बाह्म
णा पुनरुपनयनं च कार्यं। बाल्ये तु तस्य माता भ्राता पिता वा कुर्यात्। ज्ञाने तु तप्तकृच्छ्रं पराकं चान्द्रा
यणं च क्रमात् कुर्यात्। सुरासंस्पृष्टपाने आर्द्रलक्षणं आर्द्र सुराभाण्डोदकादिपाने च सुरापानसम
मेवा सुरासंस्पृष्टशुष्कर [illegible] लेतस्य मूत्रविड्रेतःशवादीनां वाज्ञानात् कृच्छ्रं कार्यं पुनरुपनयनं।
शुष्कसुराभाण्डोदकपाने छर्द्दनमुपवासो घृतप्राशनं च। तज्जलं पर्युषितं पीत्वा शंखपुष्पी विप
क्वं क्षीरं त्र्यहं पिबेत्। अज्ञानाभ्यासे पञ्चरात्रं पिबेत्। ज्ञानात्तु जलपाने सप्तरात्रं पिबेत्। ज्ञानाभ्या
से तु द्वादशरात्रं क्षीरेण ब्राह्मी सुवर्चलां पिबेत्। सुरापस्य सुरगंधस्य मसा घ्राणे सोमपस्ये
द स्तुत्री त्र्यप्राणायामान् कृत्वा घृतं प्राश्नीयात्। मसा वेद्विगुणं सर्वत्र। असोमपस्येदं न स्तु प्राणा
यामान् कुर्याद् कं वा कु [illegible] साक्षात्सुरागंधघ्राणे तु ज्ञातिश्चंद्राकरे मर्के सातपने। मसा वेकायंद्रे
यमिसाह्य। इति सुरापानप्रायश्चित्तं। अथ मधपानप्रायश्चित्तं। तत्र गौडीमाध्वीच सुरा मधं।

तालं पानसं स्त्रा सं माधुकं खार्ज्जुरं सैर माद्रिक्ष्टं मैरेयं नारिकेरमेतान्येवमेकादश मद्यानि विंध्यान्ते
तानि मद्यान्येतस्य ब्राह्मणानां तत्स्त्रीणां वा नुपनीतस्य कन्याया चापेया निक्षत्र वैश्ययोर्नपेयं नं दु
ष्यंति। अज्ञानात् जलादि तु ध्याना तालादि मद्यपाने तप्तकृच्छ्रं पुनरुपनयनं च। मूत्रविड्रेतःशवादि सं
द्विजानां वेवा। अज्ञानात् गौडी माध्वी ज्ञाना नालादि मद्यपाने तु कृच्छ्राति कृच्छ्रं चान्द्रायणं यथा
वा पुनरुपनयनं च। घृतप्राशनं च। गौडीमाध्वीज्ञानात् सान्ने पिण्याकेन कणौ धात्रेवा विकं
अभ्यासे षडब्दं अत्यंताभ्यासे निरंतराभ्यासे च द्वादशाब्दं कुकालाभ्यासे तु अग्निवर्णं मधं पी
वा मरणेतः शुद्ध्येत्। तालादि पुनरर्द्धं कल्प्यं। सर्वत्र स्त्रीबालवृद्धादीनामर्द्धं। अनुपनीतस्य कन्याया
श्च पादं माता भ्राता पिता वा कुर्यात्। तालादिमद्यपेया ले मूत्रं विड्रेतः शवादीनां सुरव
नाजवंगो क्षीरो वैडुंर बिल्व पलाश कुशोदकं पञ्चरात्रं पिबेत्। गौडीमाध्वीस्तु द्विगुणं। अज्ञा
नात् गौडीमाध्वीमधवासितशुष्कभाण्डांबु मधपाने कुशमूलविपक्वं क्षीरं त्र्यहं पिबेत्। अज्ञान
तोभ्यासे तु क्षीरोदुंबर बिल्व पलाश कुशोदकं त्र्यहं। अज्ञानात् संताभ्यासे शंखपुष्पी शृतक्षीरं
पञ्चरात्रं पिबेत्। ज्ञानतोभ्यासे तु गोमूत्रयावकं सप्तरात्रं। अत्यंताभ्यासे तु ब्राह्मी सुवर्चलां प
यसा द्वादशरात्रं। तालादिमद्यभाण्डोदकेपाने स्वर्द्धं कल्प्यं सर्वत्र स्त्री बालादीनां योग्यं कल्प्यं॥

इति मद्यपानप्रायश्चित्तम्। अथ सुवर्णस्तेयप्रायश्चित्तम्। स्तेयशब्देन समक्षं परोक्षं वा बलाच्छलेन वा परस्य
द्रव्यस्य स्वत्वविनाशहरणमुच्यते। तत्रादौ सुवर्णप्रमाणं निरूप्यते। गवाक्षगतसूर्यरश्मिमध्ये दृश्य-
मानं त्रसरेणुप्रमाणं रज इत्युच्यते। त्रसरेणवोऽष्टौ लिक्षा। लिक्षात्रयं राजसर्षपः। राजसर्षपत्रयं गौ-
रसर्षपः। गौरसर्षपषट्कं यवः। यवत्रयं कृष्णलः। कृष्णलपञ्चकं माषः। षोडशमाषकं सुवर्णम्। अज्ञानात्
ब्राह्मणस्वं सुवर्णं हृत्वा द्वादशवर्षाणि ब्रह्महत्याव्रतं शवशिरोध्वजनरकपालधारणरहितं चरेत्।
[illegible] कस्यापि हिरण्यं यः कश्चिद्धरति स तस्यैकादशगुणं दत्वा प्रायश्चित्तं समाचरेत्। गुरूणां यज्ञक-
र्तॄणां वा श्रोत्रियाणां वा धार्मिकब्राह्मणानां वा सुवर्णं हृत्वा स नो मुण्डनं कृत्वा स्वशरीरं घृतेना-
भ्यज्य करीषाच्छादितो दग्धः शुध्येत्। निर्गुणविप्रसुवर्णहरणे न वा [illegible] दृष्टमेकदेशे [illegible]
[illegible] कुटुम्बरक्षार्थं हरसि [illegible] खड्गादिकं [illegible] वा कुर्यात्। मत्या यः कश्चिद्ब्राह्मणसु-
वर्णहारी एकस्तु [illegible] स्वपापं [illegible] पापं निवेद्य आयसदण्डं खादिरं वा प्रदाय मुक्तकेशी
[illegible] राज्ञा सकृद्दण्डेन ताडितो मृतो वा जीवन्वा शुध्येत्। स्वशक्त्या ताडनेन राज्ञस्तद्दोषः स्या-
त्। सुवर्णस्तेयी ब्राह्मणो व्रतमाचरेत्। न दण्डेनात्मानं घातयेत्। न वा [illegible] राजा हन्यात्। हनने

ब्रह्महत्या तस्यैव। अग्निहोत्री धार्मिकश्च विद्वान् ब्रह्मवित् यो ब्राह्मणसुवर्णहारी अश्वमेधेन शुध्ये-
त्। गोसवयज्ञं कृत्वा वा शुध्येत्। आत्मसंमितेन हेम दत्वा वा शुध्येत्। नातिबहुना तावता परस्य [illegible]
विप्रस्य कुटुम्बरक्षणपर्याप्तं धनं दद्यात्। अब्राह्मणश्चेद्ब्राह्मणस्य सुवर्णस्तेयी दण्डताडनेनामम-
रणमनिच्छंस्तु सुरापानव्रतं कृत्वा शुध्येत्। यद्वा [illegible] ततो राज्ञा तानुक्षापः [illegible]
वा तत्रापस्तम्बोक्तं चतुर्थकालमिताशी नान्यत्। मनसा सुवर्णस्तेये प्रवृत्तः स्वयमेवोपरतस्त्रि-
रात्रं [illegible] शुध्येत्। सुवर्णस्तेयसमेष्वश्वरत्नमनुष्यस्त्रीभूधेन्वाहरणादिषु
सुवर्णस्तेयप्रायश्चित्तमीदृक् कार्यम्। त्रसरेणुप्रमाणहेमस्तेये एकः प्राणायामः। लिक्षाप्रमाणहे-
मस्तेये त्रयः प्राणायामाः। राजसर्षपप्रमाणहेमस्तेये चत्वारः षड्वा प्राणायामाः। गौरसर्षप-
प्रमाणहेमस्तेये अष्टसहस्रगायत्रीजपः। यवप्रमाणहेमस्तेये आनरात्र्यं सायंकालं तु
गायत्रीजपः। कृष्णलप्रमाणहेमस्तेये सान्तपनं। माषप्रमाणहेमस्तेये गोमूत्रपक्वयवभो-
मासत्रयेण शुध्येत्। सुवर्णप्रमाणात्किंचिन्न्यूनहेमस्तेये गोमूत्रपक्वयवकुशोदकेन शुध्ये-
त्। [illegible] सुवर्णप्रमाणब्राह्मणहेमस्तेये द्वादशाब्दं व्रतादिकं कार्यमित्येके। सुवर्णप्र

माणान्यूनरजतस्तेये सांतपनं । निष्कचतुष्कप्रमाणादूर्ध्वं दशनिष्कांतं रजतस्तेये चांद्राय
णं कार्यं । दशनिष्कप्रमाणादूर्ध्वं शतनिष्कांतं रजतस्तेये चांद्रद्वयं । शतनिष्कप्रमाणादूर्ध्वं स
हस्रनिष्कांतं रजतस्तेये चांद्रत्रयं । सहस्रनिष्कप्रमाणादधिकं रजतस्तेये पादोनज्ञा
नकृत्याब्दं चरेत् । नागरंगाम्रस्कतापित्तलकांस्यानां सहस्रनिष्कप्रमाणात्स्तेये पुराकां
रं तेषां निष्कसहस्रादिमूल्यानां स्तेये अज्ञानकृतप्रायश्चित्तं षोडशाब्दादिकं । चतुर्निष्कमू
ल्यरत्नस्तेये सांतपनं । चतुर्निष्कमूल्यादूर्ध्वं दशनिष्कमूल्यांतं रत्नस्तेये चांद्रं । दशनि
ष्कमूल्यप्रमाणादूर्ध्वं शतनिष्कमूल्यांतं रत्नस्तेये चांद्रद्वयं । शतनिष्कमूल्यादूर्ध्वं
सहस्रनिष्कमूल्यांतं रत्नस्तेये चांद्रत्रयं । सहस्रनिष्कमूल्यादधिकरत्नस्तेये अज्ञानकृ
तप्रायश्चित्तं पादोनं नवाब्दिकं । अज्ञानतः स्पर्शितोपि सुवर्णहिता षडब्दं चरेत् ।
नरसिंहरंगोमेवहरणे षडब्दं ॥ इत्यादिस्पर्शसारे सुवर्णस्तेयप्रायश्चित्तं ॥ ॥

अथ गुरुतल्पगप्रायश्चित्तं । जनकोगुरुस्तत्तल्पस्तस्य तत्पर्यायो । अज्ञानेन मातरं गत्वा मा
तृसपत्नीं सवर्णां कुत्समवर्णां कामतया ओत्साहितो ज्ञानाज्ञात्वा वापि तो लोहस्त्रियं सुतनमोमा
लिंग्यमतः शुद्ध्यै । न मायःशायने सुप्त्वा वामे तः शुद्धिः । जन्ये यो ओत्साहितो तु तप्तायःशायने
तप्तायस्याः आलिंगने शुद्धिः । स्वयं ओत्साहगनश्चेत्स्वस्य गुह्यत्रिकं स्वहस्तछिन्नं स्वांजलि
ना धृत्वा नैरृतीं दिशं गच्छन् यत्र न स्थितं मविचारयन् पतेत् स पतनोप्राणांतं शुद्ध्येत् । अमत्या
सवर्णेतिमवर्णस्त्रीगमने द्वादशाब्दं अत्यंतहत्याव्रतं । अमत्या भ्रातृसंप्रतोक्तौ शुद्धितः करीषा
राशिमध्यस्थपादादिसर्वांगदाहान्मृतः शुद्ध्येत् । जनन्या मत्या चैवं जनन्यां मत्या अप्रवृत्तोसं
रेतःसेका त्प्राक् निवृत्तस्य द्वादशाब्दं । अमत्या षडब्दं । सवर्णेतिमवर्णा सुमत्या प्रवृत्तो रेतःसे
कात्प्राक् निवृत्तस्य षडब्दं । अमत्या त्र्यब्दं । मत्या मातुः सपत्नी सवर्णा व्यतिरिक्ता गत्वा वेद
जपसहितं चांद्रत्रयं कुर्यात् । अमत्या कृच्छ्रं । क्षत्रियां पितृसौयीं मत्या विप्रः सकृद्गत्वा नवाब्दं
चरेत् । अमत्या त्र्यब्दं सेतु वृषणौ विना लिंगछेदात् शुद्धिः । अमत्या सकृद्गत्वा त्रैवार्षिकमष्टमका

सर्वं

ज्ञानाच्चेत्स्वसेकं कृच्छ्रमेव। एकेन रोधादिना बहूनां वधे द्विगुणं व्रतं। अज्ञानाद्बहुघेन मिथ्यो वधेने
ष्ट्याश्च वधे द्विगुणं। अज्ञानाद्देवे घेनहित बुध्यावोष धदाने पादव्रतं। रोधादौ व्यवहृत कर्त
कुरोधने पादं धने अर्द्धं योजने पादोनं। निपातने सर्वं। अज्ञानाद्रोधादिकृतात उजन्यत्र मा
दपरिहारार्थमवेक्ष्यमाणेमत्ने कार्यं कृत्वा विश्रान्तं सो ऽपगो मिथुनं दद्यात्। रोधनादिश्रमाद्
रक्षणाकरणे कृमात्या दोहे त्रिपादं सर्वाणि त्रैमासिकादीनि कार्याणि विहृत्वा धारेन्यत्र दा
हतिवाहवानासापुच्छादिच्छेदे नदीपर्वतादिरोधे निदाहे निदमने संघाते योत्रने शृंखलो
माल्लिकेरज्ञा पावालमोजादिहदपाशबद्धे मृते पादोनं सर्वत्र घंटादिभूषणनिमित्ते अर्द्धं
कृच्छ्रं। मृतवत्कल्प्येषु यथेनु सक्कुयावक लेशपयो दधिघृतानि क्रमान्मासार्द्धं कुर्यात्। विप्रायौ
भोऽपगोदघात्। मरणहेतुव्याधिमुपाय द्वादशरात्रं पंचगव्यं पिबेत्। श्रृंगास्थिभंगे चर्म
विमोचनादौ वृगविजीवति मासार्द्धं यवान्नं पिबेत्। अशक्तो पयो दधि घृतं वा दशरात्रं पिबेत्
अनुयास्तु अयोजकादीनां स्ववधदोषतारतम्यं। अरक्षापिक्षानिमित्ते जलपंकाग्नि वा
विषमस्थाने डगंयियत्न्यगहबंधे विषृत्सर्पमृगव्याघ्रश्वापदाघैः श्रीनवाताघैरुघनाघै

१२

श्यगोस्वामी कार्यं कुर्यात्। कार्यो तस्यग्रहे वहूं। गूढगर्तनिर्गमनार्थं संदंशादंडोकुशादिभ वेत्रा
निमित्ते वधे रक्षणार्थं रोधे बंधे चनदोषः। औषधस्नेहाहारदीयमाने हितार्थं दाहच्छेदने शिरा
लेदेषु वयाम घातेशरोघे गृहतंगेअनिवृष्टौ कुड्यादिपाते वारण्यगृहदग्धे मादिदाहे वह्निबाना
स्ति। वहे मृते पादं वरलगवि स्त्री समवि वक्षितं। सर्वत्र हतगोस स्थानं तन्मूल्यं वा गोस्वामि
ने दत्वेव प्रायश्चित्तं। राजदंडं वत्समं। एतत्सर्वं हंतुराश्रमेण स्यैव। क्षत्रियस्य सर्वत्र पादोनं।
वैश्यस्यार्द्धं। शूद्रः पादं विधात्। सर्वत्र स्त्रीबालवृद्धादीनां सर्वहं। अनुपनीतस्य पादं नस्ति
दिस्त्रस्य। स्त्रीणां तु वपनमनुगमनं गोष्टशायनं चर्मप्रावरणं च नास्ति। सर्वकेशान्समु
दृत्यद्वंगुलं छेदयेत्। सर्वत्रैवं तासां पुंसां तु पादत्रते आकंठलोम्नां वपनं अर्द्धे श्मश्रूणां
वा त्रिपादे शिखावर्जं। समस्ते सशिखवपनं। द्विजाबालवत्सर्वत्र द्विगुणं॥ इत्यादि गोवधप्रा
यश्चित्तं॥ अथ गोः पालादीनां प्रायश्चित्तं॥ तत्र सर्वाप पीनकार्थं बाढं पंचगव्यं मासे पयो मासं
परकं। त्रैमासिके कृच्छ्रं वा द्वादशपदकाः त्रावेकुर्यात्। मासव्रते उपनेन्नाघृतावेनोपनयन
कालातिक्रमे वा द्वादिश व्रतवत्कन्यतमं रात्त्या कारयित्वोपनपनं कार्यं। अनागतकालीनि

क्षान्नविक्रये सौम्यकृच्छ्रं। लाक्षालवणमधुमांसतैलक्षीरदधिघृततक्रगंधगुडचर्मवासक्षौमविक्रये चां
द्रं। ऊर्णाकेशकेसरितत्त्वधेनुवेश्मरथ्यारथ्यविक्रये चांद्रं। अत्र क्षपमासस्तस्य घृतस्थितस्वेगन रवेशुद्धिः। वि
क्रये तप्तकृच्छ्रः। हिंगुगुग्गुलुहरितालमनःशिलाञ्जनगैरिकाक्षारलवणमणिमुक्ताप्रवालवैण
यवेणुमन्मयेषु वनस्पतेकृच्छ्रः। आरामतटाकोदपानपुष्करणीसुकृतविक्रये त्रिषवणस्नायी अधः
शायी चतुर्थकालाहारो दशसहस्रजपेनाब्देन शुध्येत्। हीनमानोन्मानसंकीर्णविक्रयेऽप्येवं। ए
वमन्येष्वपि खलिखितानाधेरूढत्वेय। यत्र प्रायश्चित्तं नोक्तं तत्र पादहीनं चांद्रायणं द्विषेकं। अनापदि त्रै
मासिकं। दृष्टापण्यविक्रये प्रायश्चित्तं। अथ परिवेदने। अत्र मत्या परिवेत्ता चांद्रायणद्विषे
कं कृत्वा ज्येष्ठाय स्वोढां स्त्रियं दत्वा तेनानूढ्यां तामेवोद्वहेत्। मत्या वेत्ता चापि कन्यापित्रा
दत्वा नेत्यर्थं कार्यं। आत्मनिग्रहमेक्षायानं च प्रशाराय वं कुर्यात्। कन्यापित्रादिदातॄत्रै
मासिकं कृच्छ्रातिकृच्छ्रौ वा कृच्छ्रमेवं कुर्यात्। परिवेत्तुस्तदुद्वेक्ष्यं कृच्छ्रे कन्यायाः कृच्छ्रो दातु
रतिकृच्छ्रो होतुश्चांद्रं। एवं परिवेधवसर्यादिनपरीज्यपरिविन्नानां कार्यद्वयं। परिवेत्तृ

१५

परिवित्तकृत्पर्याध्यातृपरियष्टृअग्रेदिधिषुदिधिषुपतीनां चाप्येवं गौतमोक्तं ब्रह्मचर्यं कृत्वा पश्चाद्विवा
हः। अज्ञानादग्रेदिधिषुपतिः सकृच्छ्रं कृत्वा तामेवोद्वहेत्। दिधिषुपतिस्तु कृच्छ्रातिकृच्छ्रौ कृत्वा
तस्मै दत्वा अनुज्ञातः पुनस्तामेवोद्वहेत्। यदा अग्रेदिधिषुपतिः कार्यं कृत्वा तामेव ज्येष्ठाय पश्चा
दन्येनोढामुद्वहेत्। दिधिषुपतिस्तु कृच्छ्रातिकृच्छ्रौ कृत्वा स्वोढां ज्येष्ठां कनीयस्याः पूर्वं वोढे
दत्वान्यामुद्वहेत्। ज्येष्ठे स्थिते कनिष्ठः कृते विवाहः परिवेत्ता परिविविदानश्च सः। ज्येष्ठः
परिवित्तिः परिवेधश्च सः परिवित्तस्तु परिविन्नकितः। इत्यादि ज्येष्ठायां कन्यायाम
नूढायामनुजो दावेत्सा अग्रेदिधिषुः पूर्वा दिधिषुः॥ स्तेनकाध्यापको॥ स्तेनकाध्यापितश्च
पयस्साश्रात्मीसुवर्द्धलाब्राह्मीन्यक्षालियन्तः पिबेत्। चांद्रा द्विषेकं वा कुर्यात्। अनुयोगप्रदा
नेप्येवं। उत्कर्षहेतोरधियानस्य किं पठसि नाधीतं तवपेयेवं पर्यनुयोगोनुयोगप्रदानं।
अनुयोगप्रदानात् प्रायश्चित्तं समाकृः॥ अथ पारदार्ये॥ तत्र गुरुतल्पगतस्य मादिशेषु
प्रायश्चित्तविशेषमुक्तः। कालेऽतिमात्रं ब्राह्मणीगमनं वार्षिकं आर्हकं तत्रोक्तं वर्षे

अलाभेवधर्मकर्मसाधनौ द्विगुणवत्स्यां ब्राह्मण्यां गमने त्रिवार्षिकं। नादृश्यामेव क्षत्रि[illegible]या।
यां द्विवार्षिकं। नादृश्यां वैश्यायां वार्षिकं। शूद्रायां षण्मासिकं। एवं क्षत्रियस्यापि क्षत्रियां
दिषु षण्मासिकानि। वैश्यस्य वैश्याशूद्री वार्षिकषण्मासिके। शूद्रस्य च शूद्री परपत्न्यां
षण्मासिकमेव। अनन्यपूर्विकासु च तुरस्यासे द्वादशाब्दं। एकस्यामेव गमनात्यासे पाद
पादन्यूनं स्यात्। अमत्या सर्वत्रार्द्धं योऽयं जन्तो जातिमात्रब्राह्मण्यां त्रैमासिकं। क्षत्रिया
दिस्त्रीषु द्वैमासिक वाऽर्द्धमासिकानि। क्षत्रियादीनां क्षत्रियादिस्त्रीषु द्वैमासिकादीन्येव।
अमत्या ब्राह्मणाद्याः षष्ठैकादशागोदानं मासं पंचगव्यं मासं कापंचकमाकुर्युः। शूद्रा
गमने तु मासकायाहं ब्राह्मणश्च देद्वेश्याः पूर्वकं ब्राह्मणत्वात् प्यं शूद्रामधिगच्छेन्निधूनं
धर्मकर्मणः कृच्छ्रं। अनिधृतधर्मकर्मणोति कृच्छ्रः। द्विजातिस्त्रीषु विप्रोगतासु हि स्त्रियो व्येति
वरितासु अमत्यागमने त्वेषं। मत्याकृच्छ्रद्वयं। वर्णस्त्रियोपि बन्धुर्वप्रतिवारे स्वैरिण्यः पं
वमेवयका। स्वैरिणीगमनेषु शूद्रयां सचैलस्नानं उदकुंभं विप्राय दद्यात्। वैश्यायां च तु

र्थिकाल्लाहाविप्रान्तोजयेत्। क्षत्रियायां विरात्रोपोषितो यवाढकं दद्यात्। वेधकीसु तु ब्राह्मण्यां किंचि
द्दद्यात्। क्षत्रियायां धनुः। वैश्यायां वस्त्रकं। शूद्रायाम्तु उदकुंभं दद्यात् विप्रः। इदं च प्रायश्चित्तं गौतानु
सृत्रिविषयं। गर्भोत्पत्तौ यद्यं त्रोषणाय प्रायश्चित्तमुक्तं। तद्देशान्तरं द्विगुणं कुर्यात्। प्रातिलोम्ये गम
ने पुंसो वधः। स्त्रियाः कर्णादिकर्तनं। स्वस्त्रीत्यां सा प्रातिलोम्यगमने ब्राह्मण्यां शूद्रस्य द्वादशा
ब्दं। वैश्यादेः पादपादह्रासः। असंतव्यक्तिचरितब्राह्मण्यां तु शूद्रस्य गोमूत्रयावकं मासः। वैश्यस्य
क्षत्रियस्य च कृच्छ्रसांतपनं च। रजकचर्मकारनिषुव्याधशैलूषनटबुरुडकैवर्तमेदाम्लेच्छा
नां। एते रजकाः कापालिकास्यन्तद्वाः। रजकाद्यंत्यजागमने स्वमत्या ब्राह्मणस्य पराकृच्छ्रां द्वाम
त्या चांद्रद्वयं। क्षत्रियादीनां पादपादह्रासः। अन्त्यासेकृच्छ्राब्दं रेतःसेको त्वाद्विः एतौ कायं वा
ज्ञात्वाघंसावसापि स्त्रीगमने तु गुरुतरप्रायश्चित्तं गुरुतल्पप्रकरणे दर्शितं। चांडालादिषु ग
तेसि गो द्वादशाब्दार्हं गुरुतल्पव्रतं। स्त्रीणामपि सवर्णानुलोमगमने यत्पुरुषाणां त्रैवार्षिकादि
कं तदेव कार्यं। प्रातिलोम्यगमने तु शूद्रा ब्राह्मणी गच्छेद्वारणे वैश्यपिता[illegible]न क्षिपेत्। ब्राह्मण्याः

वनमयूरचक्रवाकवटकवलाकादिविषहकं कश्वाविद्कारंडवक्रौंचेन भासराजपक्ष्यादिषु गौर्देया।
काकोलूककपोतकुक्कुटहंसपक्ष्यादिषु द्विवर्षं व्रतं। भक्ष्यापरवे शरीरलावकसारिकादिषु द्वि
वर्षीव्रतं। टिट्टिभतित्तिरिमद्गुडिंडिकादिषु उपक्षिवधे कवर्षीव्रतं। क्रव्याद व्याघ्र शृगालादि मृग
वधेषु वानरखरहंसरूपेन कं कुरंग आदिषु जलचरबलाकादि पक्षिषु स्थलचरबलाकादिषु ता
समस्तरवैतेषां प्रत्येकवधे गौर्देया। क्रव्याद हरिणादि मृगेषु खंजरीटादि पक्षिषु च वत्सतरी दे
या। सरीसृपेषु यो दंडस्तीक्ष्णो त्तयायसः। पद्मासूकेदि वर्षीव्रतं। गौं चैत्रिवर्षं। मृगपक्षिषु नपुंस
कवधे त्रपुसीसकं माषप्रमाणं देयं। पलालभारो वा। सूकरे घृतकुंभः। तित्तिरौ तिलद्रोणं। पशुहा
नात्राकौ द्व्यकल्पन यानत्समस्पकृच्छ्रादिकार्यं। पक्षादानात्राको गजगंडश्वावराश्चोष्ट्रखरगो
रगवयकृष्णमहिषमेषादिषु मत्स्याप्रत्येकवधे सार्द्धकृच्छ्रः। समस्तवधे वाद्रः। मत्स्याप्रत्येकवधेवां १९
द्रोः समस्तवधेलीध्वजिः। हरिणसारंगरुरुवराहसिंहगंडकेसरव्याघ्रमकरमहामत्स्ययाह
१९ शिशुमारादीनां मत्स्याप्रत्येकं कृच्छ्रः। समस्तवधे कृच्छ्रद्वयं। मत्स्याप्रत्येकवधे चैवं। समस्तव
धे वा शो। श्वद्वकवानरजंबूकविडूराहादिषु मत्स्याप्रत्येकं त्रिरात्रं। समस्तवधे कृच्छ्रः। मत्स्याप्र
त्येकवधे चैवं। समस्तवधे द्विगुणं। मार्जारसर्पजगरडुंडुत्तनकुलमंडूकाखुमीथिकाकर

टालस्लसेधागोधाशल्यककूर्मशशादिषु मत्स्याप्रत्येकवधे पादकृच्छ्रः। समस्तवधेलार्द्धकृ
च्छ्रः। मत्स्याप्रत्येकवधेवं। समस्तवधे कृच्छ्रः। हंसादिषु मत्स्याप्रत्येकवधे कृच्छ्रः। गृध्रादिषु पाद
न्यूनकृच्छ्रः। शुकादिषु अर्द्धकृच्छ्रः। मत्स्याप्रत्येकवधे चैवं। टिट्टिभादिषु पादकृच्छ्रः। समस्तवधादे
नाद्विगुणं। हंसबकुलेवुगजादिषु प्रत्येकं कृच्छ्रः। हरिणादिषु त्रिरात्रं। श्वादिषु द्व्यहं। मा
र्जारादिषु उपवासः। हंसादिषु त्रिरात्रं। गृध्रादिषु द्व्यहं। शुकादिषु उपवासः। टिट्टिभादिषु नक्तं।
मत्तप्रायेषु अमत्स्याप्रत्येकवधेषु गजादिषु त्रिरात्रं। हरिणादिषु द्व्यहं। खरादिषु वनुपर्वि
लः। मार्जारादिषु उपवासः। गृध्रादिषु नक्तं। शुकादिषु एकभक्तं। टिट्टिभादिषु जलेनाप्राणायामः।
अविज्ञात सर्वमृगपक्षिषु त्रिरात्रमित्यादि देशकालजातिशक्तिगुणापेक्षया गुरुविषये
लघुविषये च योज्यं॥ इति हिंसाप्रायश्चित्तं॥ अथ गुल्मलतावीरुधां फलपुष्पादिति रूप
योगिनां छेदने गायत्र्याष्टोत्तरशतं जप्यं। तावत्प्रपत्नीजपो वा १०८ औषधीनां यथाप्पार
ण्यानां तथैव छेदने दिवा गोचैयपरिवर्यां निशारात्रौ क्षीरपी चैव स्वपेत्। पंचमहायज्ञा सह

हार्य्यमेवं छेदनेन दोषः। कृष्या कूपकरणादि दृष्टार्थमेवं न दोषः। वैश्यस्य ग्रामग्रामसीमा पुण्यस्थान
देवालयस्तंभस्मिन्नश्वत्थे वाट वृक्षछेदने कृच्छ्रो द्विगुणः। दंडानुसारेण प्रायश्चित्तं
कार्यं सर्वत्र। शूद्रस्य जपस्थाने दंडानुसारेण द्विरात्रादिकल्पनं वृक्षछेदे तस्यासेवांद्यादिवृक्षका
र्यं॥ इति वृक्षादिछेदप्रायश्चित्तं॥ अथ मार्जारादिहत्येषु॥ मयूरकण्टगात्तरवरोहविड्वराहा
हिकाककुक्कुटवानरपुंश्चलीकृत्यादासजातितित्तिरहंसः। राजहंसे न्यासे रधः पयसा द्विरात्रं।
अग्निहोत्रैकरात्रं। ब्रह्मचारी त्रिरात्रं। नासेरूर्ध्वं द्विगुणं। वक्त्रे त्रिगुणं। मस्तके चतुर्गुणं। प
तितमांगे समुद्रगानदीस्नानं प्राणायामशतं च कृत्वा घृतेनैकरात्रं। अयामेध्यस्य जलेप्रा
णायामं कृत्वा घृतेनैकरात्रं। अश्वरास्कोगवाणाश्चवाणाश्च पिपसितेनिर्हारितेः शुद्धिः। राज
यंताराको हिरण्योदकमिश्रं घृतं प्राश्य शुध्येत्। ईषद्दृष्टेनु नासेरधश्चैदापा हितीया
तेः स्नानं। प्राणायामत्रयं च। नासेरूर्ध्वं द्विगुणादि। मार्जारमूषककृकवाकादिनकुलोश्वा
जमहिषीहीनजातारण्यमृगेदृष्टे जले दशप्राणायामाः। ईषद्दृष्टस्य पंच। क्षत्रियादेः

प्रादपादस्पृष्टं शूद्रस्य कूपवासे नवानेन गोभिस्नानेन वाऽमंत्रकप्राणायामेन वा शुद्धिः
ब्राह्मणी दष्टास्नातो दितं प्रहृन सप्तं दृष्ट्वा शुध्येत्। कृच्छ्रादिव्रतस्य दृष्टा त्रिरात्रमुपोष्य
घृतं प्राश्य कं छु स्नात्वा नयोपदेशमाचरेत्। आत्मणपनुसारेण क्षत्रियादिस्त्री ज्ञानेन चौरज
स्वलाश्वादिदष्टा पंचरात्रं निराहारा पंचगव्येन शुध्यति। नासेरूर्ध्वं मस्तके च द्विद्वि
चतुर्गुणादि योज्यं। श्वादिः आतस्यवावलीढस्य च नखैर्विलिखितस्य वा शुद्धिः प्रक्षालनमग्नि
नावोपतापनं। श्वादिदंशाराख्याघातादिजनितव्रणे कृमिजनने गवां मूत्रपुरीषेणा
त्रिसंध्यं स्नानमाचरेत्। नासेरधश्चेत्त्रिरात्रं पंचगव्यप्राशनं स्यात्। ततआकंठात्
रात्रं। द्विरात्रं व्रणेनुकार्यं। तत्र श्वादिदंशव्रणे तदृशप्रायश्चित्तं ततरमिदं कृमिजनन
निमित्तं प्रायश्चित्तं कार्यं। राख्यादिव्रणे वेवमेव त्र्यहं पंचगव्यप्राशनादिकं। क्षत्रियादि
षु पादपादह्रासः। अन्यव्रणे कृमिदोषे कूपवासो हिरण्यं च दत्वा कृच्छ्रेण शुद्धिः।

निर्देनाथोपजीवनेचांद्रादिद्वंकं त्रैमासिकं। नास्तिक्यं वेदोक्तकर्मनिंदनं तेन जीवनं नास्तिक्य
धर्मिलं नास्तिक्ये सकृत्कृते कृच्छ्रः। नास्तिक्याभ्यावृत्तौ तप्तकृच्छ्रः अभ्यासे चांद्रादिद्वैकं। अभ्य
नास्ति निवेशने बहुकालाभ्यासे पंचाब्दं आसन्नगृहे तैक्षचर्या॥ अथ व्रतलोपे॥ तत्रोपकु
र्वाणो नैष्ठिकश्च त्रैवर्णिक ब्रह्मचारी स्त्रियं गत्वाऽवकीर्णी भवति। तत्र गुरुतल्पे तत्सम्बन्ध
गुरुप्रायश्चित्तमुक्तं। ततोन्यस्त्रियं गत्वा स नैर्ऋतदेवतेन रक्षोदेवतेन वै क्षीकाक्षगर्दभेन
पशुनारण्ये वनुष्ययेरात्रौ लौकिकेऽग्नौ पाकयज्ञधर्मेणाश्वलायनादिगृह्योक्तपशुकल्प
तंत्रेणेष्ट्वा तस्याजिनमूर्ध्ववालं परिधाय त्रिषवणस्नायी लोहितपात्रः स्वकर्माचक्षाणः सप्तगृ
हे भैक्ष्यान्येकवाराशी वत्सरेण शुध्येत्। पशावशक्तौ राकोनुनैर्ऋतं चरुं निरुप्य पञ्चकामाय स्वा
२१ हा कामकामाय स्वाहा निर्ऋत्यै स्वाहा रक्षोदेवताभ्यः स्वाहेति कृत्वा होमशेषं समाप्य ब्रह्म
वरिता शुध्येत्। इदं वार्षिकं व्रतं मत्त्रो ब्राह्मणपत्न्यां वैश्यायांऽत्रियपत्न्यां वा ज्ञेयं।
गुणवत्यां वा क्षत्रियायां श्रोत्रियपत्न्यां द्विवार्षिकं गुणवत्यां ब्राह्मण्यां त्रिवार्षिकं। अपत्न्याव

कीर्णश्च वार्षिकं रुद्धा ने ब्रह्महत्याव्रतं षण्मासं चीरवासा श्चरेत्। ईषद्धृष्टि वारिण्यां वैश्यां द्विवार्षिका
दिद्युम्नस्याहि। अत्यंत व्यभिचारितासु स्त्रीषु शूद्र्यां सचैलं स्नात्वा उदकुंभं दद्यात्। वैश्यायां चतुर्थ
कालाहारो ब्राह्मणान् भोजयेत्। यवसत्तारं वा गोभ्यो दद्यात्। क्षत्रियायां त्रिरात्रोपोषितो घृतप
त्रं दद्यात्। ब्राह्मण्यां षड्रात्रोपोषितो गां दद्यात्। गोष्ठ वकीर्णः कार्यं। पंढायां पललभारं सीसमाषं
च दद्यात्। स्त्रीसंयोगं विना मत्या रेतो विसृज्य नैर्ऋतयागमात्रं दिवा स्वप्ने चैवं। कृच्छ्रं चांद्रादि अन्ते
वा तिदिष्ट ब्रह्मचर्ये छुरेत स्कंदने चैवं। न देवयागमात्रं। स्वप्ने रेतस्कंदने ब्रह्मचारी स्नात्वार्कमर्चयि
त्वा पुनर्मामैत्विंद्रियमित्यृचो त्रिर्जपेत्॥ वानप्रस्थो यतिश्च मत्या ब्रह्मचर्यलोपे पराकत्रयमुक्तमव
कीर्णिव्रतं चरेत्। अमत्या कृच्छ्रत्रयमुक्तं। संन्यस्तस्य गार्हस्थ्यपरिग्रहे षाण्मासिकं कृच्छ्रं कृत्वा
पुनर्जातकर्मादि संस्कारैः शुद्धिः पुनः संन्यासेन। क्षत्रियस्य चांद्रत्रयं। वैश्यस्य कृच्छ्रत्रयं। यद्वै
तानि ब्राह्मणस्यैव शक्तिसत्त्वे स्त्रीसापेक्षया योज्यानि। अनाश्रमे निषिद्धानां चैवं। मरणस
त्या सिंतानुजलाप्य द्धिं धनं स्वपुत्रानां ज्ञात्वापानाद्याकृष्यतानां विषप्रतिनमतः प्रस्थानगमना
पः शस्त्रघात त्यक्तानां चांद्रं तप्तकृच्छ्रं च यथाशक्त्यापेक्षया ज्ञेयं। आरसाद्यगायकस्त्रीयम

अपश्यत्यात्तुः कृमिकत्वाजुर्वी भार्या मनिपुत्रोऽमस्यागत्वा वोद्दो ॥ मस्यासंवत्सरे ब्राह्मण गृहे सैद्धे
यरेत् ॥ रजस्वलां स्वभार्याममत्यासकृत् कृत्वा त्रिरात्रांते घृतं प्राश्य विशुध्यति ॥ अस्या सेसस्पृश
त्रं ॥ मत्यासस्त्रियस्मरात्रं ॥ अस्यास्तीति कृच्छ्रः ॥ असंतानवछिन्नाभासत्रै वार्षिकं ॥ अथ रजस्वला
नां परस्पर स्पर्शनिवक्ष्यते ॥ रजस्वले द्वे सवर्णे वासवर्णे कृतर्केवा मत्या परस्परं स्पृष्टे स
द्यः स्नानेन शुद्ध्यतः ॥ असपत्न्यौ स्तः सवर्णयोर्यो निगोत्रसंबद्धयोरमत्या स्पर्शे स्नानमात्रं ॥ म
त्या तेकरात्रं ॥ निराहारं वा ॥ पंचगव्याशनं वा ॥ असंबद्धयोः सवर्णयोः स्पर्शने तु अमत्या स्नानं वा
दिनांते रात्र्यंते वा शुद्धिः ॥ मत्या स्पर्शे ला... स्नानम्... भुंक्तो प्रतिदिनमुपवासस्तावद्वाने
वा ॥ असवर्णयोस्तु स्पर्शे ब्राह्मणीशूद्रयोर्मत्या स्पर्शे ब्राह्मण्याः कृच्छ्रः शूद्रायाः पादकृच्छ्रः ॥
ब्राह्मणीवैश्ययोः स्पर्शने ब्राह्मण्याः पादोनकृच्छ्रः ॥ वैश्यायाः पादकृच्छ्रः ॥ ब्राह्मणीक्षत्रिय
योः स्पर्शे ब्राह्मण्याः कृच्छ्रार्द्धं ॥ क्षत्रियायाः पादकृच्छ्रः ॥ क्षत्रियाशूद्र्योः स्पर्शे क्षत्रियायास्त्रि
रात्रं ॥ शूद्रायास्त्वहोरात्रं ॥ क्षत्रियावैश्ययोः स्पर्शे क्षत्रियायास्त्रिरात्रं ॥ वैश्याया अहोरात्रं ॥
वैश्याशूद्र्योः स्पर्शे वैश्यायास्त्रिरात्रं ॥ शूद्रायाश्चतुर्थकालाहारः ॥ एवासवर्णस्त्रीणां मत्या

२२

स्पर्शे शुद्धिः ॥ अमत्या स्पर्शे तु सवर्णामधिकवर्णां वा स्पृष्ट्वा स्नायादेव हीनवर्णां स्पृष्ट्वा वाऽशुद्धे
नाश्नीयात् ॥ यदि भुंक्ते पश्चात्त्रिरात्रोऽनन्तउपवासः ॥ नावृद्धानं वा ॥ विप्रभोजनादिकं वा प्रत्याम्नायं
कुर्यात् ॥ चांडालाद्यंत्यावसायिपतितशवादीनां मत्या स्पर्शने तदाघ्राणन्य भुंजाना नातिक्रम्य प्रायश्चि
त्तं कुर्यात् ॥ तत्र प्रथमेह्नि स्पर्शे त्रिरात्रं ॥ द्वितीये द्व्यहं ॥ तृतीये त्वहोरात्रं ॥ परतो नक्तं ॥ प्रथमादिदि
ने यदि भुंक्ते पश्चाद्धांडु पादपादन्यूनं दिनानुसारेण कुर्यात् ॥ अमत्या चांडालादिस्पर्शे तु तदा
घनाहारकाले नैव शुद्ध्येत ॥ तत्र प्रथमादिनैदिने भुंक्तौ प्रत्याम्नायः ॥ मत्या रजकादिस्पर्शे तु म
त्या चांडालादिस्पर्शवत् प्रथमादिदिने भुंक्तौ कृच्छ्रद्वयं अर्द्धार्द्धन्यूनं कुर्यात् ॥ अमत्या रजकादि
स्पर्शेवत् तदाघ भुंजानाकालेनैव शुद्ध्येत भुंक्तौ प्रत्याम्नायः ॥ श्वसृगालवानरखरोष्ट्रविड्
क राहकाककुक्कुटपंचमौष्ठिकशूद्राणां मत्या स्पर्शने तदाघ्राणन्य भुंजाना नीला प्रायश्चित्तं कुर्यात् ॥
प्रथमेह्नि स्पर्शे द्व्यहं ॥ द्वितीये होरात्रं ॥ तृतीये नक्तं ॥ ततः परं नक्तं ॥ अत्र प्रथमादिदिने भुंक्तौ क
मात् पादपादन्यूनं कुर्यात् ॥ अमत्या श्वादिस्पर्शे तदाघ भुंजाना नैव कालेन शुद्ध्येत ॥ भुंक्तौ प्रत्याम्ना
...चंडालरजकरजस्वलादिसंस्पृष्टानां मत्या स्पर्शने हीनामेध्यादिनलोच्छिष्टस्पर्शे

नेवत दाघतान्यभुंजानातिक्रम्य प्रथमे ह्नि स्पर्शे तूपवासः। द्वितीये नक्तं। तृतीये त्वेकभक्तं। परतः पूर्ववत् व्या
प्रथमाह्नि दिने भुक्तौ त्रिद्येकरात्रोपवास नक्तानि। अमत्यान्तस्पृष्ट स्पर्शनेप्या तु स्नाकाले न शुद्ध्येत्।
भुक्तौ अस्यान्नायः। अशक्तौ च मत्या चंडालादि रजकादि स्पर्शने सद्यः स्नात्वा शुध्यति रा यं दृदर्शनी
नाश्नीयात्। असमर्थौ स्नातानन्तरं हैयाधात्। उच्छिष्टयो रजस्वलयो रमत्या स्पर्शने। अज्ञाने
कृच्छ्रेण स त्रिरात्रेण शुद्ध्येत्। शूद्रा ह्नैरूपोषिता। अन्यवर्णस्त्रीणामनुच्छिष्टानां मत्यापर
स्पर स्पर्शने मत्याय श्वतं तन्देनो च्छिष्टानाम मत्या स्पर्शनेपि। मत्यो च्छिष्टयोः स्पर्शने नक्त
द्विगुणं। उच्छिष्टा द्विजान् रजस्वलास्पृष्टा चेद्यस्तनो च्छिष्टे तूपवासः। अर्थो च्छिष्टस्प
र्शने त्रिरात्रं। रजस्वला भुंजानो च्छिष्टा च चंडालादि स्पर्शने तदा घहान्य भुंजानीता। प्रथमे
२४
ह्नि स्पर्शे गोमूत्रयावकं षड्रात्रं। द्वितीये चतूरात्रं। तृतीये द्विरात्रं चतुर्थे तूपवासः। अथ
प्रथमाह्नि दिनैर्दिने भुक्तौ त्रिरात्रोत्तरं कार्यं। श्वादि स्पर्शे तिदा घभुक्तौ च चतूरात्रादि। प्रथ
माह्नि नेभुक्तौ तु पवासोत्तरं त्रिरात्रं। चंडालरजक श्वादि संस्पृष्टस्पर्शने तदा घभुक्तौ वै

२४

त्रिरात्रादि। प्रथमाह्नि दिने भुक्तौ अस्यान्नायः। सर्वत्राशक्तौ दानं दद्यात्। विप्रेभ्यो भोजनं वा
न्यदानं तत्समं कुर्यात्। ततः शुद्धा सवैविधिवान्वयेत्। अशुद्धवित्रेअज्ञा यस्य समुत्पन्ने रजो
दृष्टे त्वेवं। सपत्नी रजस्वलास्पृष्टा रजोदृष्टे सद्यः स्नात्वा शुध्येत। असपत्नी सवर्णा स्पृष्टा
रजोदृष्टा चेकरात्रं निराहारा स्यां। हीनवर्णास्पृष्टा रजोदृष्टा वा शुद्धेर तु स्नात्वा पंचगव्याशनेन।
चांडालादि सूतिका शावमृतस्परिवारकादि स्पर्शे रजोदृष्टा वा शुद्धेर तु स्नात्वा पश्चाच्छांद्र रजको
दि स्पर्शे रजोदृष्टा वा शुद्धेर तु स्नात्वा पश्चात्कार्यं। श्वादि स्पर्शे रजोदृष्टे त्रिरात्रं। अन्यास्पृ
ष्टापि परतो रजोदृष्टा तु पवासः। अप्रायस्य समुत्पन्ने रजोदृष्टे सर्वत्र बालापत्याया अति पके
कृते मुक्तिः स्यात्। पश्चाद्दन्नदानं अस्यान्नायः। इतरस्या आशुद्धेर भोजनं। भुक्तौ प्रति दिनं तु
नमु पवासः। अस्यान्नायो वा। कृच्छ्रव्रतादि व्रतस्था याः स्नाने नैमित्तिके प्राप्ते। रजोदृष्टौ
पात्रांतरिततोयेन स्नानं ततोद्भिः सिक्तगात्रा वस्त्रपीडनमन्यवस्त्रधारणं वा मलाव्रतं स
माचरेत्। आनाशौच मध्ये नाशौचे वा मध्ये जातु दर्शने व स्नाता भोजनं शुद्धा तु पवासः। आ

तैव मध्येम्न ता त्रैभ्वेत्तु स्नानमात्मनः। रजस्वलायाश्च गतस्पृष्टाया रजस्वलाभिस्तावणे उपवासः॥ रज
